**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Volume - 5, Issue - 5, MAY - 2022 Publication Date: 31/05/2022

DOIs:10.2018/SS/202205019 --:-- Research Article

# ललितराघवमातृकायाः एकमवलोकनम्

[1] **Mr. Sameera Biswal,** [2] **Prof. Chakradhar Behera,**

[1]Ph.D in Sanskrit, Dept. of Sanskrit, Pondicherry Central University, Pondicherry
[2]Prof. in Sanskrit, Dept. of Sanskrit, Pondicherry Central University, Pondicherry
Email – [1]sameerabiswal@gmail.com, [2] cdbehera24@gmail.com

**सारांश :** प्राचीनकाले यदा लेखनसामग्रीणामुद्भवः नासीत्, तदा तत्कालसम्भवाः दार्शनिकाः, काव्यशास्त्रज्ञाः, वैयाकरणाः, समाजसुधारकाः स्वस्वविचारं हस्तलिखिते लेखनपद्धतौ संरक्षणं चक्रुः। तादृशं पुरालेखनं मातृका, पाण्डुलिपि इति नाम्ना प्रसिद्धाऽस्ति। मातृकाणां पाठसम्पादनं कृत्वा तस्य यथार्थ संरक्षणेन पुरातन ज्ञानविज्ञनं न विनश्यति। अतः लुप्तप्रायस्य संस्कृतवाङ्मयस्य पुनर्जीवनाय सम्पादनात्मकः शोधः संप्रति अत्यावश्यकः। सम्पादनात्मकः शोधः यद्यपि नवीनतां न सृजति तथापि मौलिकतां न जहति। पूर्वलिखितस्य जराजीर्णस्य कीटदंष्ट्रस्य वा अंशस्य संशोधनेन शुद्धपाठप्रदर्शनपुरःसरं मूलपाठनिर्णयात्मकः शोधः अत्रान्तर्भवति। विविधयुक्तिभिः समालोचनात्मकः लघुप्रबन्धः प्रामाणिकत्वेन स्वीक्रियते। किं च पुराकाले एकस्यैव ग्रन्थस्य अनेकेषु स्थानेषु लिपिकारैः ताडपत्रेषु लिखित्वा संरक्षितमासीत्। यदा प्रकाशनाय अवसरः आयाति, तदा एकाधिकानां मातृकाणां पाठभेदेन शुद्धपाठो निर्णियते। अतः सम्पादनात्मकः शोधो नितराम् आवश्यकः। अत्र पाण्डुलिपिगतं मूलतथ्यं संरक्षयन् शोधकर्त्ता लेखकस्य मौलिकं पदसंयोजनं च अपरिवर्त्त्य शुद्धपाठ्यं निर्णयति। सूक्ष्मबुद्ध्या परिशील्य विषयविन्यासः संपादनात्मकदृष्टिभङ्गीं विषयगतपाण्डित्यं च नितरामपेक्षते। प्राचीनसंस्कृतग्रन्थानां प्रकाशनं प्रायः संपादनात्मकशोधानुसारं विधियते।

**मुख्य शब्द :** पाण्डुलिपिः, ललितराघवमहाकाव्यम्, श्रीनिवासरथः, नरसिंहदिक्षितः, रामायणम्।

**प्रस्तावना :** संस्कृतवाङ्मये साहित्यजगति महाकाव्यं सर्वोत्कृष्टं अन्यतमं च वर्तते। महाकाव्येषु रामायणाधारितं श्रीनिवासरथेन[i] विरचितं ललितराघवमिति महाकाव्यम् अन्यतमम्। संसारे किमपि काव्य लोकप्रियतायां वाल्मीकिना विरचितस्य रामायणस्य समतां कर्तुं न क्षमते, अतएव चास्य प्रचारोऽपि पूर्णतया जातः। निर्माणकालादेव खल्वेतद् रामायणं काव्यरूपकादीना निर्माणप्रवृत्तानां विदुषां हृदयान्याचकर्ष। अस्य रामायणं आधारिकृत्य श्रीनिवासरथेन विरचितस्य ललीतराघव[ii] महाकाव्यस्य विषयवस्तुनि सर्गेण प्रतिपादितम् अस्ति। इदं काव्यं 22 सर्गेण[iii] विषिष्टम् एकं महाकाव्यं अस्ति। आदिकाव्ये रामायणे यदकिञ्चितविषयं वर्णितं अस्ति यथा समाज समृद्धि, प्रकृति, भाषा, रस, अलंकार तथावत् श्रीनिवासरथ कृतं ललितराघवमहाकाव्ये अपि वर्णितं अस्ति।

**ललितराघवमहनायता :** शास्त्रेषु एतादृसः विषयः शन्ति येश्च प्रकासित ग्रन्थेषु नोपलब्यन्ते। तथाऽपि तत् शास्त्रं पाण्डुलिपिरुपेण मातृकारुपेण मातृकालये उपलभ्यन्त। तेषु श्स्त्रेषु ललितराघवमहाकाव्यम् मन्यतममस्ति। यतञ्च द्वाविशंति स्वर्गेषु उपनिवद्धम् वर्तते। रामायणम् प्राचिनकालात् एव मतिवप्रसिद्ममस्ति। अपि च जनेषु मार्गदर्शने प्रमुखभूमिकां निर्वहति। अतएव अस्य महाकाव्य स्य सम्पादनं अत्यावस्यकमं वर्तते।

**ग्रन्थकर्तुः परिचयः** संस्कृतवाङ्गमये केचन एतादृशः कवयः सन्ति येषां नामदेशकालादिनां विषये ज्ञानं न भवति। तता अपि अस्माकं पाश्वे प्राचीन ग्रन्थटीकादिषु वर्णितानि कानिचन तथ्यानि सन्ति एषां अध्ययनेन तद् कवीनां नामकालदेशमादीनां ज्ञानं भवति। तथैव नरसिंहदिक्षितेन रचितायां श्रीनिवासरथविजय इति नाटिकायां[iv] प्रकृत ग्रन्थस्य लेखक सम्वन्धि प्रमाणम् उपलभ्यते। यद्यपि सा नाटिका प्रकाशित ग्रन्त रूपेण सम्प्रति नोपलभ्यन्ते। प्राप्त तथ्यानुशारं विजयनाटिकायां क्षीनिवासस्य सद्गुणस्य विषयः वर्णितः। अस्या नाटिकायां चत्वार सर्गाः सन्ति। तत्र तृतीयाङ्के श्रीनिवासरथस्य कालविषयः वर्णितः। शक एरा अनुसारं तस्य कालः नेत्रदन्तिसरचन्दि शताव्दि अर्थात् 1582 ई.अस्ति। श्रीनिवासस्य जन्मनः विषये एतद् तथ्य प्राप्यते यत् तस्य जन्मा[v] खोर्धा इति नगरे अभवत्।

History of Classical Sanskrit Literature by M. Krishnamachariar इदं पुस्तकात् अपि च New Catalogue Catalogorum, (NCC) इत्यस्मात् इयं सूचना लभ्यते यत् श्रीनिवासरथः एव ललितराघवम् माहाकाव्यस्य रचयिता इति।

**ललितराघवमहाकाव्यम् :** रामायणमाधारितं ललितराघवमहाकाव्यं एकः सरलः सुवोधः व्यवहारऽपयोगिश्च ग्रन्थ वर्तते। अस्मिन महाकाव्ये रामायणस्य घटणाक्रमः उत्तमचरित्रम च वर्णितं मस्ति। द्वाविशति सर्ग विशिष्टस्य अस्य महाकाव्यस्य[vi] प्रत्येक सर्ग भिन्न नाम्नाः परिचितः अस्ति। राजकौसिकसम्वादनामके प्रथमसर्गे दीलीपस्य पुत्रस्य रघुः राजयोगविषयः वर्णितः। महाकाव्यस्य द्वितियः स्वर्गः राघवप्रदान नाम्ना कविनां सुचितः। एतद् महाकाव्यं ललितराघवं इति कथं कथ्यते अपि च अस्य नाम्नाः सार्थकता विषये सविस्तृत रूपेण प्रतिपादनं कृतं वर्तते।

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Volume - 5, Issue - 5, MAY - 2022 Publication Date: 31/05/2022

तृतियसर्गः ताडकानिधनम् इति ज्ञायते। अस्मिन सर्गे अतद् वर्णितमस्ति यत् त्रेतया युगे ताडकानामकी एकाराक्षसि ऋषिनपिडयतिस्म अतएव विश्वामित्रस्यनिर्देषे रामलक्षणाभ्यं ताडकायाः वधः कृतः। चतुर्थ स्वर्गस्य नाम यज्ञ रक्षा इति अस्ति। अस्मिन सर्गे रामेण विश्वामित्रस्य यज्ञेस्य रक्षा कृता। इति विषयः वर्णितः। रामलक्षणयो अनवरतं दृढतापूर्वकं सड दिनानि निसा च विस्वामित्रस्य यज्ञे विघ्नभूतानां रक्षसां वधं अकोरताम्। धनुरभङ्गनामके पञ्चमसर्गे रामेण शीवस्य धर्नुभङ्गः इति विषयः व्याख्यायितः। षष्ठः सर्गः सीताविवाह नाम्ना ज्ञायते। अस्मिन सर्गे सीतारामयोः विवाहस्य वर्णनं अस्ति। सप्तम सर्गे सीतायाः गृहप्रवेसः वर्णितः। अष्टमसर्गः रामभिषेक इति कथ्यते। अस्मिन वसिष्ट द्वयः रूषयः व्राह्मणश्च रामस्य राज्याभिशेकं कुर्वन्ति। राजपरिभवनत्याग इति नवम सर्गः। अस्मिन सर्गे मात्राकैकेय्या दशरथःरामस्य चतुर्दश वर्षाणां वनवासः याचितः तथा च रामः पितुः प्रतिज्ञापालनाय सीतालक्षणभ्यां सः वने अगच्छत्। दशमसर्गः राजनिधनमनुविधानं इति अस्ति। अस्मिन सर्गे रामस्य वनवासेगते अयोध्यायां वर्णनं अस्ति। दशरथसंस्कारनामकः एकादशसर्गः कथ्यत। अस्मिन सर्गे पुत्रभियोगे दशरथस्यसर्गवास तथा च भरतशत्रृघ्नभ्या कृतान्तष्टिसंस्कारः वर्णितः। द्वादशसर्गः खरसैन्यविध्वशं इति नाम्यतः। सर्गेस्मिन वनवासकाले रामेण अनेक राक्षसाम् वधम् कृतं इत्येतदविषयं वर्णितम् अस्ति। त्रयोदशेसर्गे रावणेन छलेन सीतायाः मपहरणं वर्णितम् अस्ति। चतुर्दशसर्गः कपिसेना आगमनं इति नाम्ना उल्लेखितः। सर्गे अस्मिन सीतायाः अन्वेषणं वानारसेनायाः सज्जिकरण वर्णितं अस्ति। पञ्चदशसर्गे गृध्रयटायस्य जटायोः वर्णनं अपि प्राप्यते तथा च हनुमतः समुद्रलङ्घन अपि अत्र वर्नितं अस्ति। षोढशसर्गः सीता दर्शनं इति नाम्ना ज्ञायते। अस्मिन सर्गे हनुमान अशोकावाटियां मातारं सीतां मिलित्वा रामस्य मुद्रिकां यच्छति। सप्तदशसर्गः लङ्कादाह इति कथ्यते। सर्ग अस्मिन हनुमान अशोकवाटिकायां उत्पातं करोति तथा च लङ्कां दहति। अष्टादशसर्गः विभिशण परित्यागः इति नाम्ना उच्यते। अस्मिन् सर्गे रावणः विबिषणं कृध्यते तम् च स्व राजात निष्काषयति। नवदससर्गः समुद्र प्रतरणं इति नाम्ना आख्यायते। अस्मिन् सर्गे नलनिलयो कृतसेतुवन्धः वर्णितः। विशंतिसर्गः लङ्काविरोध इति नाम्ना कध्यते। एकविशंतिसर्गः नागपाशविमोक्षनाम्ना आख्यायत। अस्मिन् सर्गे मेघनादेन रामलक्ष्मणौ नागपाशास्त्रेण वन्धितै। द्वाविशंति सर्गे वलद्वयविमर्दन नाम्ना ज्ञायते। सर्गेस्मिन् रावणकुम्भकर्णयोः हननं वर्णितं अस्ति। एवं रूपेण रामायणमाधारितं ललितराघवमहाकाव्यं सुविस्त्रित रूपेणं सुवोधव्यं भाषया च विरचितं।

**उपसंहारः** बहुविद्याधारिण अपि मातृकाशास्त्रविषये प्रायेण न श्रृतम्। अत एव बहव्यो मातृका अप्रकाशितरुपेण प्राप्यन्ते। वस्तुत अधुना प्रकाशितग्रन्थाः पुराकाले हस्तलिखितग्रन्थरूपेणैव आसन्। तेषामभाव एतेऽधुनातन ग्रन्थाः नैवस्तित्वामप्राप्स्यन्ते। सर्वेषां शास्त्राणामियं स्थितः। अत एव सर्वेषां शास्त्राणामाधाराः मातृकाः, पाठप्रामाण्यमपि मातृकाभ्य एव भवति। कदाचित् पुस्तकानामदर्शनं भवेत्। किन्तु हस्तलिखितेषु सुरक्षितानां ग्रन्थानां पुनः सम्पादनं शक्यम्। अनेके शास्त्रग्रन्थाः आधुनिकेऽपि बहुप्रयुक्ता ग्रन्था अद्यावधि ग्रन्थागारेष्वेव हस्तलिखितरूपेण अवलेक्यन्ते। तेषां शास्त्रदृष्ट्या सङ्कलनं, सूचीकरणम्, अध्ययनं, संरक्षणं, पद्धतिपुरस्सरं संशोधनं, सम्पादनञ्च भवेत्। एतद्विषयकं शास्त्रीयं ज्ञानं सर्वविषयाणां सर्वशास्त्राध्येतृणां छात्राणां भवेत् तथा ते च एतेषां संङ्कलनं सूचीकरणसंरक्षणसम्पादनादिषु बद्धपरिकराः स्युः। ग्रन्थेष्वस्माकं संस्कृतिः, शास्त्रज्ञानं च निहितं विद्यते। तत् सर्वत्र जगति ज्ञानं भवेत् येन च भारतीयानां विश्वस्य आधिभौतिकाध्यात्मिकाधिदैविकसमुत्कर्षसिद्धिद्वारा परमोक्षताप्राप्तिः स्यादिति मम मतम्।

**सहायक ग्रन्थ सूची :**

1. New Catalogue Catalogorum, (NCC). An alphabetical of Sanskrit and allied work and authors. UNIVERSITY OF MADRAS.
2. A Descriptive Catalogue of Sanskrit manuscript, (kavya and Alankar). Government Oriental Manuscripts Library (GOML).
3. The Contribution of Kerala to Sanskrit Literature, K. Kunjunni Raja, University of Madras,1958
4. History of Classical Sanskrit Literature, Kavyavinoda, Sahityaratnakara M. Krishnamachatiya, Tirumalai tirupati Devasthanams Press Madras, 1937.
5. संस्कृत साहित्य का इतिहास, डाँ. कैलाशनाथ द्विवेदी, राष्ट्रियसंस्कृत साहित्य केन्द्र, जयपुर, २००८।
6. संस्कृतसाहित्य रचना का इतिहास, आचार्य जयशङ्करत्रिपाठी (सम्पा.), साहित्य भण्डार प्रकाशनम्, ५०-चाहचन्द, इलाहाबाद, २०२२।

**पाद टिप्पणि -**

---

[i] । NCC VOL.XXXVI,P.60
[ii] । M.KRISHNAMACHARIYA-HCSL-P.NO-305
[iii] । GOML -MT.4350
[iv] । ATCM-VOL.4,P.1C,R.NO-3705
[v] । GOML -MT.ཙཋཚཚ
[vi] । GOML -MT.4350